नुषङ्गः ५२ । घ्राणादनन्तरं वायुः । प्राणोतइति विशेषणं सर्वेन्द्रियेष्वपि द्रष्टव्यं न्यभिद्यतामिति अन्वभिद्यतामिति पाठद्वयेऽप्येकएवार्थः । श्रोत्रं दिशः प्राविशन् ५३ । आदिशब्देन केशाः ५४ । स्वराट् इन्द्रः । हरिर्विष्णुः ५५ । आम्रतं जातम् ५६ । बुद्ध्यादिषु हृदयमेवाधिष्ठानम् । गिरांपतिर्ब्रह्मा, चैत्यः क्षेत्रज्ञः ५७ । अन्वयव्यतिरेकाभ्यां क्षेत्रज्ञं विविक्तुं सर्व्वेषां पुनः प्रवेशमाह एत इति नवभिः ५८ । विराड्देहस्य व्यष्टिदेहं दृष्टान्तत्वेन दर्शयन् साङ्ख्यानुकथनस्य प्रयोजनमाह यथेतिद्वाभ्याम् ५९ । प्रथमं परमेश्वरे-भक्तिः ततोऽन्यत्र विरक्तिः ततोयोगप्रवृत्ता धीः एकाग्रचित्तं ततोयज्ज्ञानं तेन प्रत्यगात्मानं क्षेत्रज्ञं स्वस्मिन्नात्मनि कार्य्यकारणसङ्घाते विविच्य चिन्तयेत्” ६० ।

वेदान्तिमते अत्र कश्चिद्विशेषः पञ्चदश्यामुक्तः । “चिदानन्दमयब्रह्मप्रतिविम्बसमन्विता । तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा । सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्या च ते मते । मायाविम्बोवशीकृत्य तां स्यात् सर्व्वज्ञ-ईश्वरः । अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा । सा कारणशरीरं स्यात् प्राज्ञस्तत्राभिमानवान् । तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया । वियत्पवनतेजोऽम्बुभुवोभूतानि जज्ञिरे । सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम् । श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते । तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तत् द्विधा । मनोविमर्षरूपं स्यात् बुद्धिः स्यान्निश्चयात्मिका । रजोऽंशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु । वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे । तैः सर्वैः सहितैः प्राणोवृत्तिभेदात् स पञ्चधा । प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः । बुद्धिकर्म्मेन्द्रियप्राणपञ्चकैर्मनसा धिया । शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते । प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते । हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता । समष्टिरीशः सर्व्वेषां स्वात्मतादात्म्यवेदनात् । तदभावात्ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया । तद्भोगाय पुनर्भोग्यभोगायतनजन्मने । पञ्चीकरोति भगवान् प्रत्येकं वियदादिकम् । द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः । स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते । तैरण्डस्तत्र भुवनभोग्यभोगाश्रयोद्भवः । हिरण्यगर्भस्थूलेऽस्मिन् देहे वैश्वानरोभवेत् । तैजसा विश्वतां याता देवतिर्य्यङ्नरादयः । ते पराग्दर्शिनः । प्रत्यक्तत्त्वबोधविवर्जिताः । कुर्वते कर्म्म भोगाय कर्म्म कर्त्तुञ्च भुञ्जते” ।

एतन्मतप्रपञ्चस्तु “तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्म्मसहकृतापरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकं निखिलप्रपञ्चं प्रथमं बुद्धावाकलय्य इदं करिष्यामीति सङ्कल्पयति ‘तदैक्षत बहु स्यां प्रजायेयेति” श्रुतेः । तत आत्मन आकाशादीनि पञ्च भूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यन्ते । तत्राकाशस्य शब्दोगुणोवायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि अपान्तु शब्दस्पर्शरूपरसाः पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः । न तु शब्दस्याकाशमात्रगुणत्वं वाय्वादावपि तदुपलम्भात् । नासौ भ्रमः बाधकाभावात् । इमानि भूतानि त्रिगुणमायाकार्य्याणि अतस्त्रिगुणात्मकानि । एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते । श्रोत्रादीनां पञ्चानां क्रमेणैव दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः मन आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताः अधिष्ठातृदेवताः । एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्थाख्यानि कर्म्मेन्द्रियाणि जायन्ते । तेषाञ्च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः । रजोगुणोपेतैः पञ्चभूतैरेव पञ्च वायवः प्राणापानव्यानोदानसमानाख्याजायन्ते । तत्र प्रागमनवान् वायुः प्राणोनासाग्रस्थानवर्त्ती । अवागमनवानपानः पाय्वादिस्थानवर्त्ती । विष्वगमनवान् व्यानः अखिलशरीरवर्त्ती । ऊर्द्ध्वगमनवानुदानः कण्ठस्थानवर्त्ती । अशितपीतान्नादिसमीकरणः समानः नाभिस्थानवर्त्ती । तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते “तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति” त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात् । पञ्चीकरणप्रकारश्चेत्थम् । आकाशमादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्भूतेषु संयोजनम् । एवं वायुं द्वेधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषाम् आकाशादिषु संयोजनम् । एवं तेजोऽप्पृथिव्यंशानामपि । तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकं अर्द्धान्तरञ्च चतुर्व्विधभूतमयमिति पृथिव्यादौ स्वांशाधिक्यात् पृथिव्यादिव्यवहारः । तदुक्तम् । “वैशेष्यात्तद्वादस्तद्वाद” इति शा० सू० । पूर्व्वोक्तैरपञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्य्यन्तस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चककर्म्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते । तदुक्तम् । ‘पञ्चप्राणमनोबुद्धि